अवस्थितभिन्ने ३चले च । "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः" इति शकु० ।

**असंहत** त्रि० न संहन्यते इतरेण संश्लिष्यते सम्+हन—क्त न०त० । १संघातमनापन्ने २असंलग्ने "सर्व्वतश्छिद्रितं पश्चाद्धृतं वा बहुलमयुग्ममसंहतं प्रागग्रं मलमाच्छादयन्" गोभि० "असंहतमसंलग्नम्" सं०त० रघु० । सांख्यमतसिद्धे ३पुरुषे पु० । तन्मते हि प्रकृत्यादेः शय्याग्टहादिवत् संहत्यैव (इतरसापेक्षतयैव) पुरुषार्थकारित्वम् पुरुषस्य तु प्रकाशरूपक्रियायां नेतरापेक्षाऽस्तीति तस्यासंहतत्वम् । संहतपरार्थत्वात् पुरुषस्य" सां०भा० "विवादास्पदं प्रकृतिमहदादिकं परार्थं स्वेतरस्य भोगापवर्गफलकं संहतत्वात् शय्यासनादिवदित्यनुमानेन प्रकृतेः परोऽसंहत एव पुरुषः सिद्ध्यति तस्यापि संहतत्वेऽनवस्थापत्तेः । पातञ्जले च "परार्थं संहत्य कारित्वादिति" सूत्रकारेणानुमानं कृतं तत् तु यथाश्रुतमेवान्वयावयवसाधारणम् । इतरसाहित्ये नार्थक्रियाकारित्वमेव संहत्यकारिताशब्दार्थत्वात् । पुरुषस्तु विषयप्रकाशनरूपायां स्वार्थक्रियायां नान्यदपेक्षते नित्यप्रकाशरूपत्वात् । पुरुषस्यार्थसम्बन्धमात्रे बुद्धिवृत्त्यपेक्षणात् । सम्बन्धस्तु नासाधारण्यर्थक्रियेति । "संहतपरार्थत्वात्" सां०सू०भा० "अतोऽसंहतः संहतदेहादिभ्यःपरः पुरुषः सिध्यति" ।

**असकृत्** अव्य० न सकृत् न०त० । पौनःपुन्ये । "असकृदेकरथेन तरस्विना" रघुः "अन्याद्येनासकृच्चैतान् गुणैश्च परिमोदयेत्" "असकृद्गर्भवासेषु वासं जन्म च दारुणम्" इति च मनुः । "आवृत्तिरसकृदुपदेशात्" शा०सू० ।

**असक्त** त्रि० सञ्ज—क्त न०त० । १आसक्तिशून्ये २फलाभिलाषशून्ये च "असक्तः सुखमन्वभूदि"ति रघुः । "कुर्य्याद् विद्वांस्तथाऽसक्तः" इति गीता "असक्तमाराधयतो यथायथम्" किरा० । [ सक्थियम्शून्ये

**असक्थ** (क्थि) त्रि० नास्ति सक्थि यस्य वा टच् समा० ।

**असक्रा** स्त्री सम्+क्रम—विट् पृ० समोऽन्तलोपः न०त० । संक्रान्त्यां स्त्रियाम् । "न इष पिन्वतमसक्राम्" ऋ०६,६३,८, असक्रामसङ्क्रमणीम्" निरु० ।

**असखि** पु० न सखा न टच् समा० । सखिभिन्ने रिपौ ।

**असगोत्र** त्रि० न समानं गोत्रमस्य वा समानस्य सः । भिन्नगोत्रे "असगोत्रः सगोत्रोवा यदि स्त्री यदि वा पुमान् । यस्याग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि" स्मृतिः पक्षे न सादेशः । असमानगोत्रः "असमानगोत्रामुद्वेत्" भार्य्यां विन्देत" स्मृतिः ।

**असङ्कल्प** पु० विरोधे न० संकल्पाभावे । न०ब० । संकल्पशून्ये त्रि० ।

**असङ्कसुक** त्रि० न०त० । स्थिरमतौ ।

**असङ्कुल** त्रि० न सङ्कुलः । १परस्पराविरुद्धे । २ग्रामादिपथे ३विस्तीर्णे पथि च पु० ।

**असङ्क्रान्तमास** पु० न संक्रान्तः न राश्यन्तरं प्राप्तोरविर्यत्र चान्द्रमासे । शुक्लप्रतिपदादिदर्शान्ते रवि सङ्क्रमणशून्ये मलमासे । "असङ्क्रान्तमासोऽधिमासोनिरुक्तः" विवरणमधिमासशब्दे १३१ पृ० ।

**असङ्क्षेप** पु० अभावे न०त० । १संक्षेपाभावे विरोधे न०त० । २विस्तारे न०ब० । ३संक्षेपशून्ये विस्तीर्णे त्रि० ।

**असङ्ख्य** त्रि० नास्ति संख्या इयत्ता यस्य । इयत्ताशून्ये । "प्रसह्य तेजोभिरसंख्यतां गतैः" माघः । [संख्यान्विते च

**असङ्ख्यात** त्रि० सम्—ख्या—क्त न०त० । १इयत्ताशून्ये २बहु-

**असङ्ख्येय** त्रि० संख्यातुमशक्यः । १इयत्तारहिते २विष्णौ पु० "असंख्येयोऽप्रमेयात्मा" विष्णुस० संख्याहैभेदादि न विद्यते इत्यसंख्येयः भा० ।

**असङ्ग** पु० अभावे न०त० । १सम्बन्धाभावे नास्ति सङ्गोविषयैर्यस्य ३पुरुषे जीवे तस्य सर्व्वसम्बन्धशून्यत्वात् तथात्वम् । "असङ्गोऽयं पुरुषः" सां०सू० । ३सम्बन्धशून्ये ४प्रतिबन्धशून्ये च त्रि० । "असङ्गमद्रिष्वपि सारवत्तया" रघुः । [२असंबन्धे ४सङ्गतिशून्ये च ।

**असङ्गत** त्रि० न०त० । सङ्गतभिन्ने १अयुक्ते २युक्तिशून्ये

**असङ्गति** स्त्री अभावे न०त० । १सङ्गत्यभावे । सङ्गतिश्च "सङ्गतिरनन्तराभिधानव्याप्ता, आनन्तर्य्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोह्यर्थः सङ्गतिः, जायते च कार्य्ये कारणे वा ज्ञाते कारणत्वस्य कार्य्यत्वस्य ज्ञानात् किमस्य कारणं कार्य्यं वेति जिज्ञासा"दीधितिरुक्ता सा च षोढ़ा तदुक्तमभियुक्तैः "सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्य्यत्वम् षोढ़ा सङ्गतिरिष्यते" इति व्याख्यातञ्चैतत् जगदीशेन । "निर्दिष्टोपपादकत्वमुपोद्घातत्वम् "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इति प्राचीनोक्तौ चिन्तापदं कृदभिहितोभाव इति न्यायेन चिन्तनीयपरं तथा च तस्याअपि प्रकृतसिद्ध्युपपादकतया चिन्तनीयत्वं प्रकृतसिद्ध्युपपादकत्वपर्य्यवसन्नमित्यर्थः । हेतुत्वं कारणत्वम् । अवसरोऽनन्तरवक्तव्यत्वम् अनन्तरोद्दिष्टत्वम् तथा इति श्रीभास्करकृत् । निर्व्वाहकं कारणतानिर्व्वाहकं कार्य्यत्वमिति यावत् एकं कार्य्यं ययोरिति व्युत्पत्त्या एककार्य्य-